# ३. विवादः विनाशाय ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. कपिञ्जलः कुत्र वसति स्म ? (K)
2. चटकस्य नाम किम् ? (K)
3. कपिञ्जलः किमर्थम् अन्यं देशं गतः? (K)
4. शीघ्रगः कः ? (K)
5. शश-कपिञ्जलयोः विवादनिर्णायकः कः ? (K)
6. कपिञ्जलः अन्यैः चटकैः सह कुत्र गतः ? (K)
7. कः कपिञ्जलस्य कोटरे प्रविष्टः ? (K)
8. मूर्खाः कस्य परमार्थं न जानन्ति ? (K)
9. क्षणभङ्गुराः के ? (K)
10. अनित्यानि कानि ? (K)

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. वायसः सोद्वेगं किम् अचिन्तयत् ? (K)
2. वायस- कपिञ्जलयोः कालः कथं गच्छति स्म? (K)
3. शश-कपिञ्जलयोः वासस्थानविषयकः कलहः कः ? (K)

4. धर्मोपदेशं श्रुत्वा कपिञ्जलः शशकं किमाह । (K)

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. मार्जारस्य धर्मोपदेशः । (A)
2. मार्जारः शशकपिञ्जलौ कथं व्यापादयति ? (A)
3. 'विवादः विनाशाय' इति पाठस्य शीर्षिकां समर्थयत । (A)

**IV पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. किं केनापि पाशेन बद्धः? (C)
2. तच्छीघ्रं निष्क्रम्यताम् । (C)
3. मया द्रष्टव्योऽयं न्यायः । (C)
4. अहिंसैव धर्ममार्गः । (C)
5. ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति । (C)
6. यो हीनवादी स ते भक्ष्यः । (C)
7. तन्नाहं भक्षयिष्यामि । (C)

**V मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. केनापि ............बद्धः? (S)
2. परोपकारः पुण्याय............परपीडनम् । (S)
3. श्रुतेः परमार्थं.............न जानन्ति । (S)
4. ............ अहानि अतिक्रान्तानि । (S)
5. असारोऽयं ............ । (S)

( बहूनि, मूर्खाः, संसारः, पाशेन, पापाय )

**VI रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. <u>आवयोः</u> विवादः वर्तते। (S)
2. नरकपातकमार्गात् निवृत्तो <u>मार्जारः</u> । (S)
3. <u>नदीतीरे</u> धर्मवादी तिष्ठति । (S)
4. <u>अजाव्रीहयः</u> सप्तवार्षिकाः कथ्यन्ते । (S)
5. <u>स्वप्नसदृशः</u> प्रियसमागमः । (S)

************************